॥ શ્રી ॥
અથ શ્રી ત્રિવિક્રમપંડિતાચાર્યસુત શ્રી નારાયણપંડિતાચાર્યવિરચિતઃ
॥ શ્રી મધ્વવિજયઃ ॥
૬. ષષ્ઠઃ સર્ગઃ
ઐતરેયમથ કિંચન સૂક્તં સૂચયન સદસિ તત્ર ગરિષ્ઠઃ ।
શ્રોતુમિચ્છતિ સભા ભગવદ્ભ્યઃ સૂક્તભાવમિતિ તાવદુવાચ ॥ ૬.૧ ॥

વર્ણસૌષ્ઠવગરિષ્ઠમતૂર્ણં તુલ્યમાત્રમતિમાત્રસુલક્ષ્મ ।
વ્યૂઢ હૃજ્જલદ ઘોષમમુષ્યો ચ્ચારણં વિદધદભ્યધિતાર્થમ ॥ ૬.૨ ॥

લક્ષણાન્વિતતયા વચનેઽસ્મિન દેવતાગુરુમસાવતિશેતે ।
માનમિત્યપિ વિધાય ધિયા તે તત્ત તુ સૂક્તમપરાર્થમવોચન ॥ ૬.૩ ॥

સ્યાત તથેત્થમપિ સંભવિતાઽર્થઃ ત્ર્યર્થતાં શ્રુતિષુ વિત્ત દશાર્થમ ।
ભારતં નનુ શતાર્થમપિ સ્યાદ વૈષ્ણવં પદસહસ્રતયં હિ ॥ ૬.૪ ॥

ઈત્યુદીરયતિ વિસ્તૃતચિત્તે ભૂસુરા ઈહ જિગીષવ એનમ ।
ઊચુરર્થશતકં હરિનામ્નાં વર્ણ્યતામિતિ સહાસમુખાસ્તે ॥ ૬.૫ ॥

વર્ણયામિ તદહં સકલં વઃ સૌષ્ઠવાદનુ વદંતુ ભવંતઃ ।
તં વદંતમિતિ તેઽથ વદંતો બાઢમિત્યતિદૃઢોધમમાપુઃ ॥ ૬.૬ ॥

પ્રત્યયપ્રકૃતિસંગમભંગીં શબ્દશાસ્ત્રવિહતાંપ્રતિદર્શ્ય ।

શુદ્ધધીઃ શ્રુતિશિરઃ શતસિદ્ધાન અભ્યધાત સપદિ વિશ્વપદાર્થન ॥ ૬.૭ ॥

યાવદર્થશતકં ન વિશંકઃ સંતતોક્તિકૃદપૂપુરદેષઃ ।
વર્ણિતાવધૃતિ દુર્બલ ચિત્તાઃ તાવદાકુલહૃદો હ્યભવંસ્તે ॥ ૬.૮ ॥

સાંગવેદચતુરા ઈતિહાસે શિક્ષિતાઃ સુબહ્વોઽપ્યતિધૃષ્ટાઃ ।
નૈતદીરિતમહો જગૃહુસ્તે વિશ્વસંક્ષયપયોઽંધુગણા વા ॥ ૬.૯ ॥

દેવતાસ્વસુલભ પ્રતિભા તે માનુષેષુ ચપલેષુ કથા કા ।
ક્ષામ્ય સૌમ્ય સકલજ્ઞ નમસ્તે તે બ્રુવંત ઈતિ તં કિલ નેમુઃ ॥ ૬.૧૦ ॥

વેદશાસ્ત્રચતુરૈરિહ વિદ્યાવિત્તલિપ્સુભિરવાપ્તમશેષૈઃ ।
પ્રાપ કેરળસુમંડલજાતૈઃ અન્યદાયતનમાયતચેતાઃ ॥ ૬.૧૧ ॥

તર્કતંત્રકુશલાનપિ પુંસઃ ચર્કરીતિ બત સોઽયમમાનાન ।
માનમાનમયતીહ કથં નો નૈષ મંડલભુવાં સમિતાનામ ॥ ૬.૧૨ ॥

મંત્રયંત ઈતિ તે દ્વિજવર્યાઃ અન્યદેશજમુખસ્તમપૃચ્છન ।
સદ્દદાદસુશંસનનિંદાકારિસૂકતગતમર્થમુપેત્ય ॥ ૬.૧૩ ॥

તં સ્ફુટં પ્રકથયન સ પૃણીયાચ્ચબ્દમૂલમવદત પૃણ ધતુમ ।
તં જિગીષુમથ વિપ્રમદઃ પ્રીધાતુમેષ નિગદંતમુવાચ ॥ ૬.૧૪ ॥

પ્રાદિભેદમવિદન ગુણય ત્વં મૂઢ પાંસુષુ લિખન લિપિસંઘમ ।
ભત્સયન્નિતિ જહાસ સુહાસો મત્સરાકુલધિયો જડયન સઃ ॥ ૬.૧૫ ॥

તત પ્રસંગબલતોઽખિલવિદ્યાપાટવં પૃથઃ હૃદઃ પ્રતિબુદ્ધ્ય ।
આનમન સબહુમાનમમી તં યં નમંતિ કિલ નાકિનિકાયાઃ ॥ ૬.૧૬ ॥

કન્યકાદૃતસુરેંદ્રવપુઃ શ્રીદાનવાચિવરસૂકતહૃદુકતૌ ।
કુત્રચિત સદસિ તાવદપાલા કીર્તિતાઽતિતરુણીત્યયમૂચે ॥ ૬.૧૭ ॥

શ્વિત્રિણી ભવતિ તત્પદવાચ્ચેત્યાગ્રહેણ વદતોઽવિદુષોઽત્ર ।
કશ્ચિદેષ્યતિ વિપશ્ચિદિહૈનં પૃચ્છતેત્યયમગચ્છદથોકત્વા ॥ ૬.૧૮ ॥

દેશમેનમચિરાદુપયાતઃ તાદૃશાકૃતિરહો કૃતબુદ્ધિઃ ।
તાંસ્તથાઽભ્યધિત તત્પદભાવં સૂરિમૌલિમણિનાઽત્ર યથોચે ॥ ૬.૧૯ ॥

કેવલં ન સકલાઃ શ્રુતિવિદ્યાઃ માનપૂર્વકસમસ્તગિરોઽસ્ય ।
અપ્યનાગતગતપ્રતિપત્તિં શ્રદ દધુઃ પૃથલચેતસ એતે ॥ ૬.૨૦ ॥

યદ્યદેવ સપદિ પ્રકૃતં સ્યાત તત્તદેષ યદવેદખલં ચ ।
સર્વદા સદસિ સર્વબુધાનાં સર્વવિદ્યતિરિતિ પ્રથિતોઽભૂત ॥ ૬.૨૧ ॥

અપ્રયાતમપિ દેશમશેષં વ્યાનશે સુજનકૈરવબંધુઃ ।
પૂર્ણદૃક પ્રતતયા નિજકીર્ત્યા પૂર્ણચંદ્ર ઈવ ચંદ્રિકયાઽલમ ॥ ૬.૨૨ ॥

સુંદરેષુ સુરમંદિરવૃંદેષ્વિંદિરારમણવંદનકૃત્યમ ।
આચરન્નસુચિરાત સુવિચારો રૂપ્યપીઠપતિમાપ મુકુંદમ ॥ ૬.૨૩ ॥

ભૂસુરપ્રવરબુદ્ધિસમૃદ્ધિવ્યકતયુકતવપુષં રુચિરાંગીમ ।
સૂત્રદીપ્તમણિમાલિકયાઽલં ભૂષિતાં ભવનભૂષણભતામ ॥ ૬.૨૪ ॥

પાદસુંદરપદક્રમભાવૈઃ ભાસિતાંપ્રકટવર્ણગુણાઢ્યામ ।
ભારતોત્તમભૃતામનુરૂપાચ્છાદનાં સમધિકસ્વર શોભમ ॥ ૬.૨૫ ॥

રાજસૂયમુખસન્મખવૃત્તાં વાસુદેવગુણનિષ્ઠિતભાવામ ।
સર્વધર્મપરિશિક્ષણદક્ષાં વંદિતાં જનતયા જનનીવત ॥ ૬.૨૬ ॥

મૌલિસંગ્રહવિકર્ષણદૂનાં માયિના સદસિ દુષ્ટજનેન ।
ન્યાયમાર્ગમપહાય મહાંતં સ્વેશ્વરત્વમપિ સાધયતાઽલમ ॥ ૬.૨૭ ॥

સજ્જનૈઃ કતિપયૈરતિદીનૈઃ ચાલિતૈઃ કલિબલાચ્છભમાર્ગાત ।
અપ્યુપેક્ષિતવિકર્ષણદુઃખાં સાતિશોકમપિ કૈશ્ચન દૃષ્ટામ ॥ ૬.૨૮ ॥

વાસુદેવ ધરણીધર નાથેત્યુચ્ચકૈરપિ મુહુઃ પ્રવદંતીમ ।
પૂર્ણસદ્ગુણમજં ગતદોષં બિભ્રતીં હૃદિ વિવિકતમશેષાત ॥ ૬.૨૯ ॥

વાર્યતાં બુધજનૈર્નનુ હાહા નૈષ ધર્મ ઈતિ યાભિદધનામ ।

કૃષ્ણલાળિતતમામનવદ્યાં અપ્યનન્યશરણાં શરણોત્કામ ॥ ૬.૩૦ ॥

વેદિજામિવ પુરા ભરતાગ્ર્યઃ સ સ્વયં શ્રુતિતતિં ખલુ દૃષ્ટ્વા ।
પુષ્ટબુદ્ધિરકરોત કરુણાબ્ધિઃ દુષ્ટપક્ષદમનસ્થિરસંધામ ॥ ૬.૩૧ ॥

અવ્યયં સતતમપ્યુપભક્ત્યા વિત્તમગ્ર્યમિવ દૂરયિયાસુઃ ।
જ્યાયસે સગુરવે હરિગીતાભાષ્યમેષ વિરચય્ય તદાઽદાત ॥ ૬.૩૨ ॥

હેતુવાદિનિ વિશંકટબુદ્ધૌ તીર્થમર્થયતિ ગંતુમનુજ્ઞામ ।
તાં દિદેશ પુરુષોત્તમતીર્થઃ ચિંતયન સ પુરુષોત્તમ રક્ષામ ॥ ૬.૩૩ ॥

નીરજા મલયમંડલવૃત્ત્યા શ્લાઘિતો ભુવિ સદાઽયનુયાતઃ ।
સાધુપાંથપરિતાપમપાસ્યનુત્તરાં દિશમયાન્મરુદંશઃ ॥ ૬.૩૪ ॥

બુદ્ધિશુદ્ધિકરગોનિકરાઢ્યં તીર્થજાતમુભયં ચ ધરણ્યામ ।
આત્મમજ્જનત એવ નિકામં પર્યશોધયદમંદમનીષઃ ॥ ૬.૩૫ ॥

વાસુદેવપદસંતતસંગી તેજસાઽપ્યલમધઃ કૃતશર્વઃ ।
અત્યવર્તત નિતાંતમથાસૌ ગાંગમોઘમઘનાશનકીર્તિઃ ॥ ૬.૩૬ ॥

તત્ર તત્ર સ જગત્ત્રયચિત્રં કર્મ શર્મદમનુસ્મૃતિમાત્રાત ।
સંચરન વિદધદાપ નરાણાં ગોચરં બદરિકાશ્રમપાર્શ્વમ ॥ ૬.૩૭ ॥

મંડયન ભરતખંડમખંડં નાદ્રિરાયણપદોડત્ર પરો યઃ ।
તં નમન પ્રચુરધીર્હરિગીતાભાષ્યમાર્પયદુપાયનમસ્મૈ ॥ ૬.૩૮ ॥

પ્રીતયેડસ્ય પુરતો વરભાષ્યં વાચયન સ જનતામપસાર્ય ।
વચ્મિ શક્તિત ઉરુક્રમગીતાભષ્યામિત્યકથયત પુરુસંખ્યઃ ॥ ૬.૩૯ ॥

એતદર્થમતિસૂક્ષ્મમપિ ત્વં શક્ત એવ ન યદાત્થ સમસ્તમ ।
તેન લેશત ઈતીહ પદં સ્યાદ ઈત્યગદ્યત જગજ્જનકેન ॥ ૬.૪૦ ॥

તેન તત્પ્રવચને વિહતેડલં શુશ્રુવુઃ પ્રાશયિતા અપિ શિષ્યાઃ ।
ઉચ્ચતામિતિ મુહુઃ સપૃથિવ્યાસ્ફાલનં પદમહો હરિણોક્તમ ॥ ૬.૪૧ ॥

શબ્દભેદમવધર્ય તમર્ચાસન્નિષણ્ણવપુષઃ પરમસ્ય ।
તસ્ય ભાવવિદમંદમનીષઃ પ્રોત્થિતઃ પ્રવચનં વ્યધિતૈભ્યઃ ॥ ૬.૪૨ ॥

મજ્જનં વ્યધિત શીતળગંગાવારિ નિત્યમરુણોદયકાલે ।
યત સ્પૃશંતિ ન નરા હિમભીતા અંશ એષ પૃષતામધિપસ્ય ॥ ૬.૪૩ ॥

કાષ્ઠમૌનમદધાદુપવાસં શુદ્ધમપ્યકૃત શુદ્ધ હૃદિચ્છન ।
નિત્યતુષ્ટહરિતોષવિશેષં ચિંતયન પ્રભુમનંતમઠાંતઃ ॥ ॥ ૬.૪૪ ॥

પ્રૈરયત સ્વચરણે રતચિત્તં મધ્વમત્ર દિનમંડલમેનમ ।
સ્વાશ્રમોપગમનાય મુકુંદો દીપ્તિદૃષ્ટિવિદિતાગતિરન્યૈઃ ॥ ૬.૪૫ ॥

નક્તમેવ ભગવત્યુપયાતે પ્રોદિતે સતિ સહસ્રમરીચૌ ।
મૌનવાનલિખદુત્તમચિત્તઃ શિષ્યશિક્ષણપરઃ કરુણાવાન ॥ ૬.૪૬ ॥

નેદૃશં સ્થળમલં શમલઘ્નં નાસ્ય તીર્થસલિલસ્ય સમં વાઃ ।
નાસ્મદુક્તિસદૃશં હિતરૂપં નાસ્તિ વિષ્ણુસદૃશં નનુ દૈવમ ॥ ૬.૪૭ ॥

યાતિ તાવદધુનૈવ જનોઽયં વ્યાસરૂપમજિતં પ્રદિદૃક્ષુઃ ।
આવ્રજેદિહ ન વા સ હિ વેદ સ્વસ્તિ વોઽસ્ત્વિતિ યયાવથ મધ્વઃ ॥
૬.૪૮ ॥

નાથ નાથ બત નોઽત્ર વિનાથાન મા ત્યજોરુકરુણો ભગવંસ્ત્વમ ।
નોદિતં સ્મૃતમપીતિ હિ શિષ્યૈઃ સ્વામિનોઽભિમતભંગભયેન ॥ ૬.૪૯ ॥

સદ્ગુરોર્ન વિરહં સહમાનઃ સત્યતીર્થયતિરન્વગમત તમ ।
યસ્ત્રિવારમિતરાસુતશાખાસ્વર્થમગ્ર્યમાશૃણોત પુરુસંખ્યાત ॥ ૬.૫૦ ॥

દુર્ગમાર્ગગતમપ્યનુધવન નાઽપ સોઽયમરુણીભવતીને ।
લીલયા સજવમાક્રમમાણં વ્યાશ્રયાંતરસુદૂરશિલાસુ ॥ ૬.૫૧ ॥

આનિવૃત્તવપુષા ગુરુણાઽઽરાત પાણિના હ્યભિનયેન સુનુન્નઃ ।
ત્રસ્તધીરતિયયૌ સ મુહૂર્તાત તદ્દિનોપગતમાર્ગમશેષમ ॥ ૬.૫૨ ॥

આશ્રમે નિજજનાનિહ દૃષ્ટ્વા તં પ્રસાદમહિમાનમમુષ્ય ।
પ્રોચ્ય તત્પ્લવનમપ્યતિચિત્રં તસ્ય તૈઃ સહ સદાઽસ્મરદેષઃ ॥ ૬.૫૩ ॥

વાનરેંદ્ર ઈવ વાયુજવોઽસૌ ભીમસેન ઈવ દાનવભીમઃ ।
ઉલ્લલાસ ગિરિપુંગવશૃંગે સ વ્રજન વઅજિનનાશનનામા ॥ ૬.૫૪ ॥

બહુસત્ત્વગણં સવિકં સમહાવિષમોક્ષમહાહિમવંતમચમ ।
વિષમોક્ષમહાહિમવંતમચન નગમૈક્ષત ફુલ્લદૃગસ્તભયઃ ॥ ૬.૫૫ ॥

સુહસિતકમલાકરોપગૂઢં સુજનસુખાર્થમનંતભોગશય્યમ ।
વિકસિતસુમનોઘટાગમુચ્ચં મરતકરત્નમયસ્થલાગ્ર્યશોભમ ॥ ૬.૫૬ ॥

પાદોપાંતનમન્મહામુનિગણં હેમપ્રદીપ્તાંબરં
શ્રીમદ્રત્નકલાપમગ્ર્યકટકૈર્વિભ્રાજિતં હાટકૈઃ ।
દૃષ્ટ્વાતં ધરણીધરં સુવનમાલોલ્લાસિનં સુંદરં સ્વાનંદાકૃતિમસ્મરન્મુરરિપું
સ્વાનંદતીર્થસ્તદા ॥ ૬.૫૭ ॥

॥ ઈતિ શ્રીમત્કવિકુલતિલક ત્રિવિક્રમપંડિતાચાર્યસુત
નારાયણપંડિતાચાર્યવિરચિતે શ્રીમધ્વવિજયે
આનંદાંકિતે ષષ્ઠઃ સર્ગઃ ॥